# द्वितीयः अभ्यासः

# समासाः

❖ **निम्नलिखितवाक्यानि पठित्वा उदाहरणानुसारं वाक्येषु स्थूलपदाधृतानां प्रश्नानाम् उत्तराणि प्रदत्तरिक्तस्थानेषु लिखत –**

**यथा –**

जनाः **देशभक्तं** पूजयन्ति।



1. जनाः कं पूजयन्ति ? — जनाः देशभक्तं पूजयन्ति।
2. जनाः कस्य भक्तं पूजयन्ति ? — जनाः देशस्य भक्तं पूजयन्ति।

क. **वृक्षारूढाः** वानराः कूर्दन्ते।



1. कीदृशाः वानराः कूर्दन्ते ? ........................................
2. कम् आरूढाः वानराः कूर्दन्ते ? ........................................

ख. **वृक्षपतितानि** आम्राणि पक्वानि।



1. कानि आम्राणि पक्वानि ? ........................................
2. कस्मात् पतितानि आम्राणि पक्वानि ? ........................................

ग. बालकाः **क्रीडाक्षेत्रे** क्रीडन्ति।



1. बालकाः कुत्र क्रीडन्ति ? ........................................
2. बालकाः कस्याः क्षेत्रे क्रीडन्ति ? ........................................

**अत्र वयं पश्यामः यत् उपरिलिखितेषु वाक्येषु स्थूलपदानां निर्माणं द्वे पदे योजयित्वा कृतम् अस्ति।**

❖ **अधुना उदाहरणम् अनुसृत्य अधोदत्तानि पदानि पृथक् कृत्वा लिखत –**

**उदाहरणम् –** **देशभक्तम्** — देशस्य भक्तम्

क. वृक्षारूढाः ............................

ख. वृक्षपतितानि ............................

ग. क्रीडाक्षेत्रे ............................

एवम् अनेकानि पदानि योजयित्वा एकपदस्य निर्माणप्रक्रिया समासप्रक्रिया कथ्यते। संयुक्तपदं समस्तपदं कथ्यते। एवञ्च पृथक्–पृथक् रूपे स्थितानि पदानि विग्रहपदानि कथ्यन्ते। अधुना समासस्य विषये जानीमः।

- **समासः कः भवति ?**

समसनं समासः कथ्यते अर्थात् अनेकानि पदानि योजयित्वा एकपदनिर्माणस्य विधिः समासः भवति।

**समासविषये** अवश्यम् अवधातव्याः बिन्दवः –

- समासः प्रायेण द्वयोः सुबन्तपदयोः (संज्ञासर्वनामादि) पदयोः भवति न तु तिङन्तपदानाम् (क्रियापदानाम्)

**यथा –** नगरस्य समीपम् = उपनगरम्

विद्यायाः आलयः = विद्यालयः

रामः च लक्ष्मणः च = रामलक्ष्मणौ

सत्यं प्रियं यस्य सः = सत्यप्रियः

- समस्तपदम् – समासे संयुक्तं पदं समस्तपदं कथ्यते। यथा – विद्यालयः
- पदानां विभक्तियुक्तः प्रयोगः विग्रहवाक्यं कथ्यते। यथा – विद्यायाः आलयः।
- **पूर्वपदम्** – समासे यत् प्रथमं पदं भवति तत् पूर्वपदम् कथ्यते। यथा – विद्या / विद्यायाः
- **उत्तरपदम्** – समासे पूर्वपदात् अनन्तरं प्रयुक्तं पदम् उत्तरपदं कथ्यते। यथा – आलयः
- समस्तपदनिर्माणम् विग्रहवाक्ये प्रयुक्तानां विभक्तीनां लोपं कृत्वा एकपदनिर्माणं भवति।

**यथा –** विद्यायाः + आलयः = विद्यालयः किन्तु तेषाम् अर्थः तत्रैव विद्यमानः भवति। अत एव उच्यते –

**विभक्तिर्लुप्यते यत्र तदर्थस्तु प्रतीयते।**
**पदानां चैकपद्यं च समासः सोऽभिधीयते॥**

- समस्तपद-निर्माणे सन्धिः नित्यः (अनिवार्यः) भवति।

**समासभेदाः –** सामान्यतः समासः चतुर्धा भवति –

1. अव्ययीभावसमासः – पूर्वपदार्थप्रधानः
2. तत्पुरुषसमासः – उत्तरपदार्थप्रधानः (तत्पुरुष-भेदाः – कर्मधारयः, द्विगुः, नञ्, उपपदतत्पुरुषः)
3. द्वन्द्वसमासः – उभयपदार्थप्रधानः (इतरेतरः, समाहारः, एकशेषः)
4. बहुव्रीहिः – अन्यपदार्थप्रधानः (समानाधिकरणः, व्यधिकरणः)

**अधुनेदं पश्यत –**

| भेदाः | उदाहरणानि | विग्रहाः |
|---|---|---|
| अव्ययीभावः | यथाशक्ति | शक्तिम् अनतिक्रम्य |
| तत्पुरुषः | प्रजाहितम् | प्रजायै हितम् |
| द्विगुः | सप्ताहः | सप्तानाम् अह्नां समाहारः |
| कर्मधारयः | नीलोत्पलम् | नीलं च तत् उत्पलम् |
| द्वन्द्वः | फलपुष्पाणि | फलानि च पुष्पाणि च |
| बहुव्रीहिः | पीताम्बरः | पीतम् अम्बरं यस्य सः |

## ( क ) अव्ययीभाव समासः

### ( उप, अनु, निर्, यथा, प्रति, सह )

❖ **निम्नलिखितानि वाक्यानि पठत अवगच्छत च –**

1. नृपः नेत्रं **यथास्थानम्** अस्थापयत्।
2. काकः **सक्रोधं** प्रविशति।
3. राजपुत्राः वानरेभ्यः **प्रतिदिनं** भोज्यपदार्थान् यच्छन्ति स्म।
4. **उपगङ्गं** मुनेः आश्रमः अस्ति।
5. भीमः **अनुद्रौणि** धावति।
6. **निर्मक्षिकं** स्थानम् इदम्।
7. **निर्विघ्नं** कुरु मे देव! सर्वकार्येषु सर्वदा।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानि समस्तपदानि अधोलिखितानि सन्ति। एतेषां समुचितं विग्रहवाक्यं मञ्जूषातः चित्वा समक्षं लिखत –**

1. यथास्थानम् ....................................................
2. सक्रोधम् ....................................................
3. प्रतिदिनम् ....................................................
4. उपगङ्गम् ....................................................
5. अनुद्रौणि ....................................................
6. निर्विघ्नम् ....................................................

**मञ्जूषा**

| |
|---|
| विघ्नानाम् अभावः, दिनं दिनम् इति, द्रौणेः पश्चात्, क्रोधेन सहितम् (सह), गङ्गायाः समीपम्, स्थानम् अनतिक्रम्य। |

**अत्र वयं पश्यामः –** उपरिलिखितेषु समस्तपदेषु यानि पूर्वपदानि तानि अव्ययानि उपसर्गाः वा सन्ति।

- ध्यातव्यं यत् केषाञ्चन अव्ययपदानां निर्धारितेषु अर्थेषु शब्दैः सह समासः भवति।
- अव्ययीभावसमासः पूर्वपदार्थप्रधानः भवति। (अत्र पूर्वपदस्य अर्थस्य प्रधानता भवति।)
- समस्तपदे पूर्वपदम् अव्ययम् उत वा उपसर्गः भवति। प्रायशः विग्रहवाक्ये अव्ययपदस्य स्थाने तस्य अर्थवाचिशब्दः प्रयुज्यते। यथा– निर्विघ्नम् = विघ्नानाम् अभावः
- विग्रहे संज्ञापदस्य प्रयोगः आरम्भे भवति तथा च अव्ययस्य अथवा उपसर्गस्य अर्थवाचिपदम् अनन्तरं प्रयुज्यते।
- अव्ययीभावसमासेन निर्मितं पदम् अव्ययं भवति।
- अव्ययीभावसमासेन निर्मितं पदं यदि अकारान्तं भवति तदा तस्य अन्ते 'अम्' अर्थात् 'म्' इति वर्णः संयुक्तः भवति।
- अव्ययीभावसमासेन निर्मितस्य पदस्य अन्ते कदापि दीर्घः स्वरः न भवति। यथा गङ्गायाः समीपम् = उपगङ्गम्।
- अत्र 'उपगङ्गम्' इति पदे 'उप' इति अव्ययं 'समीपम्' इति अर्थे प्रयुक्तम्।

◆ एवमेव अन्येषाम् अव्ययानां तेषाम् अर्थानां च विषये प्रदत्ततालिकाया: माध्यमेन अवगच्छन्तु–

| अव्ययपदानि | अर्थः (विग्रहे प्रयुज्यमानं पदम्) | विग्रहे प्रयुज्यमाना विभक्तिः | उदाहरणानि |
|---|---|---|---|
| उप | समीपम् | षष्ठी | ग्रामस्य समीपम् =उपग्रामम् |
| निर् | अभाव: | षष्ठी | जनानाम् अभाव: = निर्जनम् |
| अनु | पश्चात् | षष्ठी | रथस्य पश्चात् = अनुरथम् |
| अनु | योग्यम् | षष्ठी | गुणानां योग्यम् = अनुगुणम् |
| यथा | अनतिक्रम्य (अनुसारम्) | द्वितीया | विधिम् अनतिक्रम्य = यथाविधि |
| प्रति | वीप्सा (द्विरुक्ति:) | द्वितीया, सप्तमी | दिनं दिनं प्रति<br>दिनं दिनम्<br>दिने दिने इति = प्रतिदिनम् |
| स (सह) | सहितम्, सह | तृतीया | मित्रेण सहितम् = समित्रम् |

**अधोलिखितानि उदाहरणानि सावधानं पठित्वा समस्तपदं विग्रहं वा रिक्तस्थानेषु लिखत –**

### ❖ उप – समीपम्

| | | | | | |
|---|---|---|---|---|---|
| उपनदम् / उपनदि | = | नद्या: समीपम् | उपनगरम् | = | ...................... |
| ...................... | = | राष्ट्रपते: समीपम् | उपयमुनम् | = | यमुनाया: समीपम् |
| उपवधु | = | वध्वा: समीपम् | ...................... | = | गिरे: समीपम् |
| उपकुलम् | = | ...................... | उपतटम् | = | तटस्य समीपम् |
| ...................... | = | गृहस्य समीपम् | उपग्रामम् | = | ...................... |
| ...................... | = | गङ्गाया: समीपम् | उपगुरु | = | ...................... |
| ...................... | = | कृष्णस्य समीपम् | उपकार्यालयम् | = | ...................... |
| ...................... | = | पर्वतस्य समीपम् | | | |

### ❖ निर् – अभाव:

| | | | | | |
|---|---|---|---|---|---|
| निर्मक्षिकम् | = | मक्षिकाणाम् अभाव: | निर्जनम् | = | ...................... |
| ...................... | = | गुणानाम् अभाव: | निर्विघ्नम् | = | ...................... |
| ...................... | = | दोषाणाम् अभाव: | निरङ्कुशम् | = | ...................... |
| ...................... | = | फलानाम् अभाव: | निष्कलङ्कम् | = | ...................... |

### ❖ अनु – योग्यम्, पश्चात्

| | | | | | |
|---|---|---|---|---|---|
| अनुहरि | = | हरेः पश्चात् | अनुरामम् | = | ...................... |
| ...................... | = | व्रतस्य योग्यम् | अनुरूपम् | = | ...................... |
| ...................... | = | वृक्षस्य योग्यम् | अनुरथम् | = | रथस्य पश्चात् |
| अनुयमुनम् | = | ...................... | ...................... | = | गङ्गायाः पश्चात् |
| अनुगुणम् | = | ...................... | ...................... | = | शम्भोः पश्चात् |

### ❖ प्रति – ( वीप्सायाम् )

| | | | | | |
|---|---|---|---|---|---|
| प्रतिदिनम् | = | दिने दिने इति | प्रतिसप्ताहम् | = | ...................... |
| प्रतिग्रामम् | = | ग्रामं ग्रामं प्रति / ग्रामे ग्रामे इति | ...................... | = | छात्रं छात्रं प्रति |
| प्रत्येकम् | = | ...................... | ...................... | = | क्षणं क्षणम् प्रति |
| प्रतिवर्षम् | = | ...................... | ...................... | = | हृदयं हृदयं प्रति |
| प्रतिराज्यम् | = | ...................... | ...................... | = | नगरं नगरं प्रति |
| प्रतिमासम् | = | ...................... | | | |

### ❖ स – सह / सहितम्

| | | | | | |
|---|---|---|---|---|---|
| सहरि | = | हरिणा सह | सस्नेहम् | = | ...................... |
| ...................... | = | रागेण सह | सरोषम् | = | ...................... |
| ...................... | = | चित्रेण सह / चित्रैः सह | साट्टहासम् | = | ...................... |
| ...................... | = | क्रोधेन सहितम् | सपरिवारम् | = | ...................... |
| ...................... | = | धनेन सहितम् | सादरम् | = | ...................... |
| सशरीरम् | = | ...................... | ...................... | = | विनयेन सह |
| सजलम् | = | ...................... | सशङ्खम् | = | शङ्खेन सह |
| सहृदयम् | = | ...................... | | | |

### ❖ यथा – एवं प्रकारेण, अनतिक्रम्य = अनुसारम्

| समस्तपदम् | | विग्रहवाक्यम् | समस्तपदम् | | विग्रहवाक्यम् |
|---|---|---|---|---|---|
| यथाशक्ति | = | शक्तिम् अनतिक्रम्य | यथेच्छम् | = | ...................... |
| ...................... | = | सामर्थ्यम् अनतिक्रम्य | यथासमयम् | = | ...................... |
| ...................... | = | रुचिम् अनतिक्रम्य | यथाबलम् | = | ...................... |
| ...................... | = | गतिम् अनतिक्रम्य | यथापरिस्थिति | = | ...................... |
| ...................... | = | प्रसङ्गम् अनतिक्रम्य | यथामर्यादम् | = | ...................... |
| ...................... | = | स्थानम् अनतिक्रम्य | यथारुचि | = | ...................... |

## समासं विग्रहं वा कृत्वा लिखत –

| | | |
|---|---|---|
| यथाशक्ति | = | ................................................................ |
| विघ्नानाम् अभाव: | = | ................................................................ |
| उपगङ्गम् | = | ................................................................ |
| रूपस्य योग्यम् | = | ................................................................ |
| प्रत्येकम् | = | ................................................................ |
| गृहं गृहम् प्रति | = | ................................................................ |
| मक्षिकाणाम् अभाव: | = | ................................................................ |
| उपनदि | = | ................................................................ |
| गर्वेण सहितम् | = | ................................................................ |
| कालम् अनतिक्रम्य | = | ................................................................ |

## अधोलिखितायां कथायां कानिचित् पदानि रेखाङ्कितानि सन्ति तेषां विग्रहान् रिक्तस्थानेषु लिखत –

एक: अतिदुष्ट: वानर: आसीत्। **प्रतिदिनं** स: **यथाशक्ति** वृक्षे स्थितान् पक्षिण: तुदति स्म। **उपनीडं** गत्वा तेषां श्रमस्य उपहासं करोति स्म। एक: पक्षी अवदत् – भो: किमर्थम् उपहससि? **अनुवृष्टि** नीडम् एव अस्मान् रक्षति। वयं परिश्रमं कुर्म: **निर्विघ्नं** च जीवाम:। वानर: **साट्टहासम्** अवदत् – मूर्खा: यूयम्! अरे योगिनां कुत: गृहम्? एवं कथयित्वा तेन दुष्टेन पक्षिणां नीडानि भग्नानि। एक: पक्षी अवदत्–योगिन: तु **प्रतिजीवम्** उपकारमेव कुर्वन्ति। किम् इदम् **अनुरूपं** साधुजनस्य?

1. ...............................  2. ...............................  3. ...............................
4. ...............................  5. ...............................  6. ...............................
7. ...............................  8. ...............................

## अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा कुरुत –

1. एकदा राजा **उपसरोवरं** विहरति स्म। ................................................................
2. प्रकृतिमाता सर्वान् **सस्नेहं** पालयति। ................................................................
3. **समयम् अनतिक्रम्य** सर्वेषामेव महत्त्वं विद्यते। ................................................................
4. मुने: आश्रम: तु **निरस्त्रम्** अस्ति। ................................................................
5. श्री ए.पी.जे. अब्दुलकलाम: **गुणानां योग्यं** भारतरत्नं प्राप्तवान्। ................................................................
6. अर्थिनां समूह: **प्रतिदिनं** राज्ञ: समीपम् आगच्छति। ................................................................
7. **अनुचयनं** नेतार: संसद्भवनं गच्छन्ति। ................................................................

## ( ख ) तत्पुरुषाः

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

**देवाधिपतिः** शक्रः नेत्रहीनयाचकस्य रूपम् अधारयत्।

तृषार्ताय **शीतलसलिलं** बहु रोचते।

**चतुर्युगम्** एव महायुगं भवति।

**अनिच्छन्** अपि वार्ष्णेय बलादिव नियोजितः।

**सर्वदा** शारदा अस्माकं मुखकमले वासं कुर्यात्।

**अत्र वयं पश्यामः यत्–**

- देवाधिपतिः – देवानाम् अधिपतिः। अत्र अधिपतिः इति पदस्य प्राधान्यम्।
- शीतलसलिलम् – शीतलं सलिलम्। अत्र सलिलम् इति पदस्य प्राधान्यम्।
- चतुर्युगम् – चतुर्णां युगानां समाहारः। अत्र युगानाम् इति पदस्य प्राधान्यम्।
- अनिच्छन् – न इच्छन् अत्र इच्छन् इति पदस्य प्राधान्यम्।
- सर्वदा – सर्वं ददाति इति सा। अत्र दानम् इति अर्थस्य प्राधान्यम्।

❖ **अवधातव्यं** यत् उपरिलिखितेषु उदाहरणेषु सर्वत्रापि उत्तरपदस्य अर्थस्य प्रधानता वर्तते। अत एव अत्र उत्तरपदार्थप्रधानः तत्पुरुषसमासः वर्तते।

- तत्पुरुषसमासस्य भेदाः सन्ति – विभक्तितत्पुरुषः, कर्मधारयः, द्विगुः, नञ्–तत्पुरुषः, उपपदतत्पुरुषः

### विभक्तितत्पुरुषः

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

1. **सत्यसमं** तपः नास्ति।
2. राजा नगरस्य समीपं **दानशालाः** अकारयत्।
3. काकानाम् ऐक्यं तु **जगत्प्रसिद्धम्** अस्ति।
4. मयूरः भारतस्य **राष्ट्रपक्षी** अस्ति।
5. राजगृहे एकं **मेषयूथम्** आसीत्।

❖ **उपरिलिखितेषु वाक्येषु रेखाङ्कितानि समस्तपदानि समुचितस्य विग्रहस्य समक्षं लिखत –**

| **यथा– विग्रहाः** | **समस्तपदानि** |
|---|---|
| 1. सत्येन समम् | ................................................................ |
| 2. दानाय शालाः | ................................................................ |
| 3. जगति प्रसिद्धम् | ................................................................ |

4. राष्ट्रस्य पक्षी ..........................................................

5. राज्ञः गृहे ..........................................................

6. मेषाणां यूथम् ..........................................................

- उपरिलिखितेषु उदाहरणेषु यत्र विग्रहाः सन्ति तत्र पूर्वपदेषु विभिन्नानां विभक्तीनां प्रयोगः अस्ति।
- एवमेव समस्तपदेषु तासां विभक्तीनां लोपः अभवत्। अतः अत्र विभक्तितत्पुरुषः समासः अस्ति।
- विग्रहे पूर्वपदे यस्याः विभक्तेः प्रयोगः भवति तन्नाम्ना एव तस्य समासस्य नाम भवति।

  यथा– सत्येन समम् – सत्यसमम्, अत्र तृतीयाविभक्तेः प्रयोगः। अत एव तृतीयातत्पुरुषः समासः।

  एषः समासः विभक्त्यनुगुणं भवति। पूर्वपदे यस्याः विभक्तेः प्रयोगः भवति तन्नाम्ना एव समासस्य नाम भवति ।

**अधुना विभक्तितत्पुरुषस्य अभ्यासं कुर्मः –**

❖ **द्वितीयातत्पुरुषः –** अस्मिन् समासे उत्तरपदे श्रित, अतीत, पतित, गत, प्राप्त, आपन्न, आरूढ इत्यादयः शब्दाः भवन्ति। एतैः सह पूर्वं विद्यमानशब्दे द्वितीया विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे द्वितीया विभक्तेः प्रयोगः भवति ।

| | विग्रहवाक्यम् | समस्तपदम् |
|---|---|---|
| यथा– | कृष्णम् आश्रितः | कृष्णाश्रितः |
| | दुःखम् अतीतः | दुःखातीतः |
| | शोकं पतितः | शोकपतितः |
| | प्रलयं गतः | प्रलयगतः |
| | सुखं प्राप्तः | सुखप्राप्तः |
| | भयम् आपन्नः | भयापन्नः |
| | ग्रामं गतः | ग्रामगतः |
| | कूपं पतितः | कूपपतितः |
| | वृक्षम् आरूढः | वृक्षारूढः |
| | मेघान् अत्यस्तः | मेघात्यस्तः |

❖ **तृतीयातत्पुरुषः –** अस्मिन् समासे उत्तरपदे पूर्व, सदृश, सम, ऊन, कलह इत्यादयः शब्दाः भवन्ति। एतैः सह पूर्वं विद्यमानशब्दे तृतीया विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे तृतीयाविभक्तेः प्रयोगः भवति।

| विग्रहवाक्यम् | समस्तपदम् |
|---|---|
| मासेन पूर्वः | मासपूर्वः |
| मात्रा सदृशः | मातृसदृशः |
| वाचा कलहः | वाक्कलहः |
| सप्ताहेन पूर्वः | सप्ताहपूर्वः |
| पित्रा समः | पितृसमः |
| सुखेन युक्तः | सुखयुक्तः |

| | |
|---|---|
| हरिणा त्रातः | हरित्रातः |
| बाणेन हतः | बाणहतः |
| विद्यया विहीनः | विद्याविहीनः |
| सर्पेण दष्टः | सर्पदष्टः |
| हस्तेन ताडितः | हस्तताडितः |
| धनेन हीनः | धनहीनः |

❖ **चतुर्थीतत्पुरुषः** अस्मिन् समासे उत्तरपदे अर्थ, बलि, हित, सुख, रक्षित, इत्यादयः शब्दाः भवन्ति। एतैः सह पूर्वं विद्यमानशब्दे चतुर्थी विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे चतुर्थ्याः प्रयोगः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| सत्काराय इदम् | सत्कारार्थम् (अङ्गवस्त्रम्) |
| पठनाय अयम् | पठनार्थः (पाठः) |
| ज्ञानाय इयम् | ज्ञानार्था (उपनिषद्) |
| भूतेभ्यः बलिः | भूतबलिः |
| जनेभ्यः हितम् | जनहितम् |
| मानवाय सुखम् | मानवसुखम् |
| भिक्षायै अटनम् | भिक्षाटनम् |
| यूपाय दारु | यूपदारु |

❖ **पञ्चमीतत्पुरुषः –** अस्मिन् समासे उत्तरपदे भय, भीत, भीति, मुक्त, त्रस्त, च्युत इत्यादयः शब्दाः भवन्ति। एतैः शब्दैः सह पूर्वं विद्यमानपदे पञ्चमी विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे पञ्चम्याः प्रयोगः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| चोराद् भयम् | चोरभयम् |
| सिंहाद् भीतिः | सिंहभीतिः |
| पदात् च्युतः | पदच्युतः |
| दुष्टेभ्यः त्रस्तः | दुष्टत्रस्तः |
| अश्वात् पतितः | अश्वपतितः |
| आलस्यात् मुक्तः | आलस्यमुक्तः |

❖ **षष्ठीतत्पुरुषः** अस्मिन् समासे पूर्वं विद्यमानशब्दे सम्बन्धार्थे षष्ठी विभक्तिः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| राज्ञः पुरुषः | राजपुरुषः |
| राष्ट्रस्य पतिः | राष्ट्रपतिः |
| देवस्य पूजकः | देवपूजकः |

| | |
|---|---|
| मातुः वचनम् | मातृवचनम् |
| हिमस्य आलयः | हिमालयः |
| सुराणाम् ईशः | सुरेशः |
| अर्थस्य गौरवम् | अर्थगौरवम् |
| भिक्षायाः पात्रम् | भिक्षापात्रम् |
| राज्यस्य कार्यम् | राज्यकार्यम् |
| क्रीडायाः कीडाक्षेत्रम् | क्रीडाक्षेत्रम् |
| राज्ञः दर्शनम् | राजदर्शनम् |

❖ **सप्तमीतत्पुरुषः** – अस्मिन् समासे उत्तरपदे प्रवीण, अन्तर्, पटु, कुशल, चपल, निपुण, सिद्ध, शुष्क, पक्व , बन्ध इत्यादयः शब्दाः भवन्ति। विग्रहे एतैः शब्दैः सह विद्यमानपदे सप्तमी विभक्तिः भवति। अर्थानुसारम् अपि पूर्वपदे सप्तम्याः प्रयोगः भवति।

| **विग्रहवाक्यम्** | **समस्तपदम्** |
|---|---|
| कार्ये निपुणः | कार्यनिपुणः |
| कार्येषु कुशलः | कार्यकुशलः |
| संस्कृते सिद्धः | संस्कृतसिद्धः |
| चक्रे बन्धः | चक्रबन्धः |
| आतपे शुष्कः | आतपशुष्कः |
| व्याकरणे पटुः | व्याकरणपटुः |
| स्थाल्यां पक्वः | स्थालीपक्वः |

## अभ्यासः

◆ **अधोलिखिते अनुच्छेदे स्थूलाक्षरेषु पदेषु समासं कृत्वा रिक्तस्थानेषु समस्तपदानि लिखत –**

**ग्रामं गतः** ...................... कश्चित् नागरिकः एकं बालकं **कूपं पतितम्** ...................... अपश्यत् । उच्चैः विलपन्ती तस्य माता अवदत् – भोः! अहं भवतः **शरणम् आगता** ...................... । कृपया रक्षतु मम बालकम् इति। नागरिकः सपदि कूपे रज्जुं पातयित्वा **सङ्कटम् आपन्नं** ...................... बालकं रक्षितवान् । **दुःखम् अतीता** ...................... सा जननी अवदत् – 'भद्रम् अस्तु ते' इति ।

◆ **अधोलिखिते अनुच्छेदे समस्तपदानि रेखाङ्कितानि कुरुत –**

कश्चित् वनवासी एकदा ग्रामम् अगच्छत्। ग्रामगतः सः तत्र यन्त्रचालितम् अरघट्टम् दृष्टवान्। अरघट्टस्य घटिकापतत् जलं क्षेत्राणि सिञ्चति स्म। यन्त्रदर्शनेन चकितः सः नगरं प्रति प्रस्थितः। तत्र आपणगतानि वस्तूनि दृष्ट्वा अचिन्तयत् – अरे! किमेतत् सर्वं मानवनिर्मितम्। अनुपमा मानवशक्तिः। विविधा भोजनसामग्री, यन्त्रनिर्मितानि परिधानवस्त्राणि, आत्मरक्षायै शस्त्राणि, शरीरशोभायै प्रसाधनद्रव्याणि, विस्तृताः सञ्चारमार्गाः, विद्युद्व्यजनानि ग्रीष्मतापहरणाय वातानुकूलनयन्त्राणि

शीतनिवारणाय उष्णकानि सन्ति। एतत् सर्वं दृष्ट्वा सः आश्चर्यविमूढः जातः। वृक्षमूले उपविश्य सः अवदत् – अहो! कथं विज्ञानाधीनः जातः अद्यतनः मानवः!

- **अधोलिखितविग्रहान् पठत अनुच्छेदात् चित्वा तेषा समक्षं समस्तपदानि लिखत –**

**यथा** – क) वृक्षस्य मूले — वृक्षमूले

ख) आत्मनः रक्षायै ..........................................................

ग) ग्रामं गतः ..........................................................

घ) वातानुकूलनाय यन्त्राणि ..........................................................

ङ) मानवस्य शक्तिः ..........................................................

च) मानवेन निर्मितम् ..........................................................

छ) आपणं गतानि ..........................................................

ज) यन्त्रस्य दर्शनेन ..........................................................

झ) यन्त्रेण चालितम् ..........................................................

ञ) सञ्चाराय मार्गाः ..........................................................

ट) विज्ञानस्य अधीनः ..........................................................

ठ) यन्त्रेण निर्मितानि ..........................................................

ड) विद्युतः व्यजनानि ..........................................................

ढ) शीतस्य निवारणाय ..........................................................

ण) आश्चर्येण विमूढः ..........................................................

त) घटिकाभ्यः पतत् ..........................................................

थ) भोजनाय सामग्री ..........................................................

द) परिधानाय वस्त्राणि ..........................................................

ध) शरीरस्य शोभायै ..........................................................

न) ग्रीष्मस्य तापस्य हरणाय ..........................................................

- **उपर्युक्तसमस्तपदानि अधोलिखिततालिकायां विभज्य लिखन्तु –**

द्वितीयातत्पुरुषः ..........................................................

तृतीयातत्पुरुषः ..........................................................

चतुर्थीतत्पुरुषः ..........................................................

पञ्चमीतत्पुरुषः ..........................................................

षष्ठीतत्पुरुषः ..........................................................

सप्तमीतत्पुरुषः ..........................................................

## कर्मधारय:

**आचार्या** – इदानीं वयं क्रीडिष्याम:। वर्गत्रये कार्यं भविष्यति। भासवर्ग:, कालिदासवर्ग:, व्यासवर्ग: च। भासवर्ग: एकं शब्दं वदिष्यति, कालिदासवर्ग: तस्मात् पूर्वं विशेषणं योजयिष्यति, व्यासवर्ग: च समस्तपदनिर्माणं करिष्यति।

**सर्वे छात्रा** – आचार्ये! वयं सज्जा:।

| भासवर्ग: | कालिदासवर्ग: | व्यासवर्ग: |
|---|---|---|
| गगनम् | नीलं गगनम् | नीलगगनम् |
| काष्ठानि | शुष्कानि काष्ठानि | शुष्ककाष्ठानि |
| भोजनम् | अमृतमयं भोजनम् | अमृतमयभोजनम् |
| ज्ञानी | महान् ज्ञानी | महाज्ञानी |

**आचार्या** – शोभनम्। किं भवन्त: जानन्ति यत् एतानि सर्वाणि कर्मधारयसमासस्य उदाहरणानि सन्ति। समस्तपदप्रक्रियायां पूर्वपदं विभक्तिरहितं करणीयम् विग्रहे च पुन: विभक्तियुक्तम्।

**छात्रा:** – आम् आचार्ये! परं कृपया बोधयतु यत् अस्मिन् समासे कस्य पदार्थस्य प्रधानता भवति?

**आचार्या** – पश्यन्तु। वयं पूर्वमेव चर्चां कृतवन्त: यत् कर्मधारय: तु तत्पुरुषस्य एव भेद: अस्ति। अत: भवन्त: एव वदन्तु कस्य पदार्थस्य प्राधान्यम्?

**छात्रा:** – अधुना ज्ञातं महोदये! अत्रापि उत्तरपदार्थ: एव प्रधान:।

**आचार्या** – अस्तु! परम् इदमपि जानन्तु यत् यत्र विशेषण-विशेष्ययो: उपमानोपमेययोश्च समास: भवति तत्र कर्मधारय: समास: भवति।

**यथा–** मधुरा वाणी – मधुरवाणी
घन: इव श्याम: – घनश्याम:

**आचार्या** – अधुना वयम् उपमेय-उपमानयो: संयोजनं करिष्याम:। पुन: वर्गेषु उपमेयम् उपमानं समस्तपदं च वदत। उपमानस्य अग्रे 'इव' योजनीयम्।

**यथा–** पुरुष: सिंह: इव – पुरुषसिंह:

| भासवर्ग: ( उपमेयम् ) | कालिदासवर्ग: ( उपमानम् ) | व्यासवर्ग: ( समस्तपदम् ) |
|---|---|---|
| मुखम् | कमलम् इव | मुखकमलम् |
| पुरुष: | सिंह: इव | पुरुषसिंह: |
| लोचनम् | राजीव: इव | राजीवलोचनम् |
| कोमलम् | कुसुमम् इव | कुसुमकोमलम् |
| पुरुष: | ऋषभ: इव | पुरुषर्षभ: |

❖ **अधुना अधोलिखितसमस्तपदानां विग्रहं रिक्तस्थानेषु लिखत –**

**यथा** – (क) महावीरः महान् वीरः

(ख) श्रान्तपथिकः .................. ..................

(ग) महात्मा .................. ..................

(घ) स्वच्छजलम् .................. ..................

(ङ) उन्नतप्रसादः .................. ..................

(च) शीतलसलिलम् .................. ..................

❖ **अधोलिखितानां विग्रहवाक्यानां समस्तपदानि रचयत –**

**यथा** – (क) महान् पुरुषः महापुरुषः

(ख) पवित्रं मनः ..........................................................................

(ग) विस्तृता नाटिका ..........................................................................

(घ) पुष्पितः वृक्षः ..........................................................................

(ङ) विकसितानि पुष्पाणि ..........................................................................

(च) कमलम् इव नयनम् ..........................................................................

(छ) पर्वतः इव उन्नतः ..........................................................................

(ज) उत्पलम् इव कोमलम् ..........................................................................

(झ) पुत्रः इव नकुलः ..........................................................................

(ञ) सलिलम् इव शीतलम् ..........................................................................

(ट) सुभाषितम् रत्नम् इव ..........................................................................

(ठ) मुखं चन्द्रः इव ..........................................................................

(ड) हिमकणं मौक्तिकम् इव ..........................................................................

(ढ) गीता अमृतम् इव ..........................................................................

## द्विगुसमासः

❖ **अधोलिखितानि वाक्यानि ध्यानेन पठत अवगच्छत च –**

1. **अष्टाध्यायी** व्याकरणस्य महान् ग्रन्थः अस्ति।
2. उदारचरितानां कृते **त्रिभुवनम्** एव स्वदेशः भवति।
3. मम विद्यालयस्य उद्याने **पञ्चवटी** अस्ति।
4. पञ्जाबप्रान्ते **पञ्चनदम्** अस्ति।

❖ **अधुना रेखाङ्कितपदानां विग्रहाः अधः प्रदत्ताः तेषां समक्षं समस्तपदानि लिखत –**

1. अष्टानाम् अध्यायानां समाहारः ..................................................

2. त्रयाणां भुवनानां समाहार: ..............................................

3. पञ्चानां वटानां समाहार: ..............................................

4. पञ्चानां नदीनां समाहार: ..............................................

❖ **अत्र वयं पश्याम: यत् उपरिलिखितेषु उदाहरणेषु पूर्वपदं सर्वत्र सङ्ख्यावाचकम् अस्ति –**

1. यदा पूर्वपदं सङ्ख्यावाचकं समस्तपदं च समाहारार्थस्य द्योतकं भवति तदा द्विगुसमास: भवति।
2. अस्य समासस्य विग्रहवाक्ये उभयो: पदयो: षष्ठीविभक्ते: प्रयोग: भवति तथा च समाहार: शब्द: अनिवार्यतया प्रयुज्यते।
3. प्राय: उत्तरपदे यदा शत, अध्याय, लोक, अष्ट, वट, पद, पर्ण इत्यादय: शब्दा: भवन्ति तदा समस्तपदम् ईकारान्तस्त्रीलिङ्गे भवति। अन्यथा अकारान्त – नपुंसङ्कलिङ्गे भवति।
4. द्विगुसमासस्य समस्तपदानि सर्वदा एकवचने एव भवन्ति।

❖ **अधोलिखितानां समस्तपदानां विग्रहं मञ्जूषात: चित्वा लिखत –**

1. सप्ताह: ..............................................
2. शताब्दी ..............................................
3. त्रिपथम् ..............................................
4. नववादनम् ..............................................
5. त्रिलोकी ..............................................
6. पञ्चगवम् ..............................................

| | | |
|---|---|---|
| पञ्चानां गवां समाहार: | नवानां वादनानां समाहार: | सप्तानां अह्नां समाहार: |
| त्रयाणां लोकानां समाहार: | शतस्य अब्दानां समाहार: | त्रयाणां पथां समाहार: |

❖ **अधोलिखितानां पदानाम् आवश्यकतानुसारं समस्तपदं विग्रहं वा लिखत –**

1. सप्तानां पदानां समाहार: ..............................................
2. चतुर्णां पथां समाहार: ..............................................
3. नवानां रात्रीणां समाहार: ..............................................
4. सप्तशती ..............................................
5. चतुर्मुखम् ..............................................
6. नवग्रहम् ..............................................
7. पञ्चानां मूलानां समाहार: ..............................................
8. पञ्चपात्रम् ..............................................
9. त्रयाणां वादनानां समाहार:, तस्मिन् ..............................................
10. पञ्चाङ्गम् ..............................................

**विशेषेण ध्यातव्यम्**

यदा पूर्वपदं सङ्ख्यावाचकं भवति परन्तु समाहारस्य बोधः अपेक्षितः न भवति तदा कर्मधारयः एव, न तु द्विगुः।

यथा – दश आननानि = दशाननानि सप्त ऋषयः = सप्तर्षयः पञ्चानां पाठानाम् = पञ्चपाठानाम्

❖ **अध मञ्जूषायां कानिचित् समस्तपदानि सन्ति तेभ्यः द्विगुसमासस्य समस्तपदानि रिक्तस्थानेषु लिखित्वा तेषां विग्रहान् अपि लिखत –**

| |
|---|
| सप्तबालकाः, सप्तपर्णी, अष्टध्यायी, चतुर्मुखानि, अष्टवादने, चतुर्युगम्, नवरत्नम्, नवदिनानि, नवरात्रम्, पञ्चवृक्षाः, चतुर्वेदम्, अष्टाङ्गम्। |

........................ ..................................................................................................

........................ ..................................................................................................

........................ ..................................................................................................

........................ ..................................................................................................

........................ ..................................................................................................

........................ ..................................................................................................

........................ ..................................................................................................

........................ ..................................................................................................

## नञ् समासः

❖ **अधोलिखितवाक्यानि ध्यानेन पठत अवगच्छत च –**

1. सरस्वत्याः कोषः **अपूर्वः** वर्तते।
2. **अनुद्वेगकरं** वचनं सर्वान् तोषयति।
3. काकः मेध्यम् **अमेध्यं** सर्वमेव भक्षयति।
4. **अनृतं** वदसि चेत् काकः दशेत्।
5. आज्ञा गुरूणां हि **अविचारणीया**।

❖ **अधुना अधोलिखितानां विग्रहवाक्यानां समस्तपदानि उपरिदत्तेभ्यः वाक्येभ्यः चित्वा लिखत –**

यथा –

1. न पूर्वः ........................
2. न उद्वेगकरम् ........................
3. न मेध्यम् ........................
4. न ऋतम् ........................
5. न विचारणीया ........................

**उपर्युक्तेषु वाक्येषु रेखाङ्कितानि सर्वाणि अपि पदानि निषिद्धार्थे प्रयुक्तानि सन्ति।**

## अवधातव्यम् –

1. निषेधार्थे शब्दैः सह नञ् इत्यस्य समासः भवति।

   यथा – न उचितम्, न ज्ञानम्

2. अत्र नञ् समासे यदि उत्तरपदस्य प्रथमः वर्णः स्वरः भवति तर्हि समस्तपदस्य निर्माणे "न" इत्यस्य स्थाने "अन्" आदेशः भवति।

   यथा – न उचितम्

   ↓

   अन् उचितम् = अनुचितम्

3. तथैव यदि उत्तरपदस्य प्रथमः वर्णः व्यञ्जनं भवति तर्हि समस्तपदस्य निर्माणे "न" इत्यस्य स्थाने "अ" आदेशः भवति।

   यथा – न ज्ञानम्

   ↓

   अ ज्ञानम् = अज्ञानम्

❖ **अधुना अधोलिखितानां पदानां समस्तपदं विग्रहवाक्यं वा लिखत –**

| | | | |
|---|---|---|---|
| न आदिः | ........................ | अविवेकः | ........................ |
| न हिंसाम् | ........................ | अनास्था | ........................ |
| न विद्या | ........................ | न सत्यम् | ........................ |
| न उत्साहः | ........................ | अप्रिया | ........................ |
| न अश्वः | ........................ | अकालः | ........................ |
| अविज्ञातम् | ........................ | न परीक्षितम् | ........................ |
| न पवित्रम् | ........................ | अनादरः | ........................ |
| अनुपस्थितम् | ........................ | न धर्मः | ........................ |
| न मन्त्रः | ........................ | अनेके | ........................ |
| असत् | ........................ | न ध्रुवम् | ........................ |
| न आगतः | ........................ | अश्रुतम् | ........................ |
| न कार्यम् | ........................ | न पठितम् | ........................ |
| न दृष्टम् | ........................ | अमूल्यम् | ........................ |
| न द्वितीयम् | ........................ | अनन्तः | ........................ |

❖ **अधोलिखितेभ्यः वाक्येभ्यः नञ् तत्पुरुषस्य उदाहरणानि चित्वा लिखत तेषां विग्रहं च कुरुत –**

1. अनृतं न ब्रूयात्। ........................ ........................
2. न ब्रूयात् सत्यम् अप्रियम्। ........................ ........................

3. अविवेकः परमापदां पदम्। ........................ ........................

4. अपरीक्षितं च न अभिनिविशेत्। ........................ ........................

5. किं हेयम्? अकार्यम्। ........................ ........................

6. किं जीवितम्? अनवद्यम्। ........................ ........................

## उपपदतत्पुरुषः

❖ **अधोलिखितपर्यायवाचिनः शब्दान् पठत –**



जलजम्, नीरजम्, वारिजम्

तोयजम्, अम्बुजम्, अम्भोजम्



वारिदाः, जलदाः, तोयदाः

नीरदाः, अम्बुदाः, अम्भोदाः, पयोदाः



वारिधिः, जलधिः, तोयधिः

अम्भोधिः, अम्बुधिः, पयोधिः



महीपः, क्षितिपः, भूमिपः, भूपः

महीपालः, क्षितिपालः, भूमिपालः, भूपालः



खगाः, विहगाः, विहङ्गाः, द्विजाः

खेचराः, अण्डजाः



महीधराः, क्षितिधराः, धरणीधराः,

भूभृतः (भूभृत्), महीभृतः (महीभृत्), क्षितिभृतः (क्षितिभृत्), भूधराः (भूधरः)

**अवधेयम् –**

- उपर्युक्तानि सर्वाणि उपपदतत्पुरुषस्य उदाहरणानि सन्ति।
- एतेषु उत्तरपदार्थः एव प्रधानः वर्तते।
- अत्र सुबन्तपदेन (शब्दरूपेण) उपपदेन सह क्रियाशब्दस्य समासः भवति।
- विग्रहे धातुरूपेण सह 'इति' अव्ययस्य प्रयोगः भवति। यथा जलं ददाति इति।
- समस्तपदस्य अन्ते उत्तरपदरूपेण क्रियायाः संक्षिप्तं रूपं प्रयुक्तं भवति यस्य स्वतन्त्रः प्रयोगः भाषायां न क्रियते। यथा– जलद, अत्र ददाति इत्यस्य स्थाने 'द' इति प्रयुक्तः।
- विग्रहे पूर्वपदे अर्थानुसारं विभक्तेः प्रयोगः भवति –

यथा –

| | | | |
|---|---|---|---|
| जायते इति | (ज) | नीरे जायते इति | = नीरजम् |
| | | अण्डात् जायते | = अण्डजः |
| ददाति इति | (द) | तोयं ददाति इति | = तोयदः |
| (अस्मिन्) धीयते इति | (धिः) | जलम् अस्मिन् धीयते इति | = जलधिः |
| पाति इति | (प) | महीं पाति इति | = महीपः |
| | | यूथं पाति इति | = यूथपः |
| | | नॄन् पाति इति | = नृपः |
| | | भुवं पाति इति | = भूपः |
| पालयति इति | (पाल) | भूमिं पालयति इति | = भूमिपालः |
| | | भुवं पालयति इति | = भूपालः |
| गच्छति इति | (ग) | खे गच्छति इति | = खगः |
| धारयति इति | (धर) | महीं धारयति इति | = महीधरः |
| | | भुवं धारयति इति | = भूधरः |
| पिबति इति | (प) | मधु पिबति इति | = मधुपः |
| | | पादैः पिबति इति | = पादपः |
| | | द्वाभ्यां पिबति इति | = द्विपः |
| करोति इति | (कर / कार) | भयं करोति इति | = भयङ्करः |
| | | कुम्भं करोति इति | = कुम्भकारः |
| | | दिनं करोति इति | = दिनकरः |
| जानाति इति | (ज्ञ) | सर्वं जानाति इति | = सर्वज्ञः |
| | | विशेषं जानाति इति | = विशेषज्ञः |

| | | | |
|---|---|---|---|
| चरति इति | (चर) | खे चरति इति | = खेचरः |
| वेत्ति इति | (वित्) | वेदान् वेत्ति इति | = वेदवित् |
| भुङ्क्ते इति | (भुक्) | हुतं भुङ्क्ते इति | = हुतभुक् |
| गायति इति | (ग) | सामं गायति इति | = सामगः |
| तिष्ठति इति | (स्थ) | गृहे तिष्ठति इति | = गृहस्थः |
| हरति इति | (हर) | मनः हरति इति | = मनोहरः |

**अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहवाक्यं वा लिखत –**

1. **सूपकारः** मेषम् अर्धज्वलितेन काष्ठेन ताडितवान्।
2. मयूरः **अहिभुक्** अपि कथ्यते।
3. जाज्वल्यमानशरीरः मेषः **निकटे तिष्ठति इति ताम्** अश्वशालां प्रविशति।
4. राजा **शालिहोत्रज्ञान्** वैद्यान् अपृच्छत्।
5. **कृतं जानाति इति** पुत्रः पितुः उपकारं स्मरति।
6. दुष्टबुद्धिः कलशे **विषधरम्** अपश्यत्।
7. अर्जुनः श्रेष्ठः **शस्त्रविद्** आसीत्।
8. मानवेन **श्रेयः करोति इति** मार्गः अनुसरणीयः।
9. सुधीः **धर्मप्रदां** वाचं वदति।
10. **द्वारस्थः** बालसमूहः मधुरस्वरेण गायति।

**अधोलिखितपद्येषु उपपदतत्पुरुषस्य उदाहरणानि रेखाङ्कितानि कुरुत –**

क) समुद्वहन्तः सलिलातिभारम्,
बलाकिनो वारिधरो नदन्तः
महत्सु शृङ्गेषु महीधराणाम्
विश्रम्य विश्रम्य पुनः प्रयान्ति।

ख) यदा किञ्चिज्ज्ञोऽहं द्विप इव मदान्धः समभवम्
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः।
यदा किञ्चित्किञ्चिद्बुद्धजनसकाशादधिगतम्।
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः॥

ग) सौख्यदं शुभदं भूयात् नवं वर्षं सुमङ्गलम्।

## ( ग ) द्वन्द्वसमासः

**एतानि उदाहरणानि पठत –**

क) ईशः च कृष्णः च = ईशकृष्णौ

ख) ग्रीष्म च वसन्तः च शिशिरः च = ग्रीष्मवसन्तशिशिराः

ग) माता च पिता च = मातापितरौ

घ) पाणी च पादौ च एतेषां समाहारः = पाणिपादम्

ङ) जननी च जनकः च = जनकौ

- अत्र वयं पश्यामः यत् उपरिलिखितेषु विग्रहवाक्येषु प्रत्येकं पदादनन्तरं 'च' इति अव्ययस्य प्रयोगः अस्ति।
- अत्र सर्वत्र द्वन्द्वसमासस्य प्रयोगः अस्ति। द्वन्द्वसमासः 'च' इत्यर्थे भवति ।
- प्रायेण उभयपदार्थप्रधानः द्वन्द्वसमासः भवति। समस्तपदे विद्यमानपदद्वयस्य अपि प्रधानता अर्थात् महत्त्वं भवति ।
- द्वन्द्वसमासः त्रिधा भवति – 1. इतरेतरद्वन्द्वः 2. समाहारद्वन्द्वः 3. एकशेषद्वन्द्वः

### इतरेतर-द्वन्द्वः

- समस्तपदस्य लिङ्गम् अन्तिमपदानुसारं भवति ।
- यदि द्वयोः समासः भवति तर्हि समस्तपदं द्विवचने अन्यथा अधिकानां समासे बहुवचने भवति।

यथा– रामः च लक्ष्मणः च = रामलक्ष्मणौ

हरिः च हरः च गुरुः च = हरिहरगुरवः

सीता च रामः च = सीतारामौ

सीता च गीता च लता च = सीतागीतालताः

माता च पिता च = मातापितरौ

❖ **अधोलिखितानां समस्तपदानां विग्रहवाक्यानि लिखत –**

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| धर्मार्थौ | धर्मः च अर्थः च। |
| हरिहरौ | ................................ |
| सुखदुःखे | ................................ |
| वृक्षलते | ................................ |
| लवकुशौ | ................................ |
| लतावृक्षौ | ................................ |
| पितापुत्र्यौ | ................................ |

पशुपक्षिणः ..............................

पत्रपुष्पफलानि ..............................

धर्मार्थकाममोक्षाः ..............................

हरिहरगुरवः ..............................

पशुपक्षिणः ..............................

**कोष्ठके प्रदत्तानि पदानि संयोज्य समस्तपदानि रिक्तस्थानेषु लिखत –**

(क) (रामः च लक्ष्मणः च) ...................... विश्वामित्रस्य शिष्यौ आस्ताम्।

(ख) (लक्ष्मणः च शत्रुघ्नः च) ...................... सुमित्रायाः पुत्रौ आस्ताम्।

(ग) (नकुलः च सहदेवः च) ...................... सहोदरौ आस्ताम्।

(घ) (युधिष्ठिरः च भीमः च अर्जुनः च) ...................... कुन्त्याः पुत्राः आसन्।

(ङ) (वसिष्ठः च विश्वामित्रः च) ...................... आचार्यौ आस्ताम्।

(च) तव (पुत्राः च पौत्राः च) ...................... चिरञ्जीवन्तु।

## समाहार-द्वन्द्वः

- समस्तपदस्य विग्रहवाक्ये शब्दानां वचनानुसारं एतयोः/तयोः समाहारः तथा च एतेषां/तेषां समाहारः इति प्रयुज्यते।
- समाहारद्वन्द्वे समस्तपदं सर्वदा अकारान्तनपुंसकलिङ्गे एकवचने एव भवति।

| | समस्तपदम् | विग्रहवाक्यम् |
|---|---|---|
| 1. | हस्तपादम् | हस्तौ च पादौ च एतेषां समाहारः |
| 2. | सुखदुःखम् | .................................................. |
| 3. | सर्पनकुलम् | .................................................. |
| 4. | सत्यासत्यम् | .................................................. |
| 5. | शीतोष्णम् | .................................................. |
| 6. | शिरोग्रीवम् | .................................................. |
| 7. | यूकालिक्षम् | .................................................. |
| 8. | पाणिपादम् | .................................................. |
| 9. | जयाजयम् | .................................................. |
| 10. | चराचरम् | .................................................. |
| 11. | गङ्गायमुनम् | .................................................. |
| 12. | दन्तोष्ठम् | .................................................. |
| 13. | सम्पद्विपदम् | .................................................. |

## एकशेषद्वन्द्वः

- एकशेषद्वन्द्वः प्रायेण युगलानां मध्ये भवति।
- विग्रहवाक्ये इतरेतर-द्वन्द्ववद् भवति।
- समस्तपदे पुंलिङ्गशब्दः एव अवशिष्यते।
- यदि द्वयोः समासः भवति तर्हि समस्तपदं द्विवचने अन्यथा बहुवचने भवति।

यथा– पिता च माता च = पितरौ

पुत्राः च पुत्र्यः च = पुत्राः

| समस्तपदम् | विग्रहवाक्यम् |
|---|---|
| हंसौ | ................................ |
| वृद्धौ | ................................ |
| भ्रातरौ | ................................ |
| बालकौ | ................................ |
| नरौ | ................................ |

## अभ्यासः

**निम्नलिखितवाक्येषु रेखाङ्कितपदेषु समासं कुरुत –**

1. लवः च कुशः च क्रीडतः। ............................................................
2. जनः सुखं च दुःखं च अनुभवति। ............................................................
3. कृष्णः च बलरामः च गच्छतः। ............................................................
4. ग्रीष्मः च वसन्तः च शिशिरः च पुनः पुनः आगच्छन्ति। ............................................................
5. पिकः च काकः च इति तयोः वर्णदृष्ट्या कोऽपि भेदः नास्ति। ............................................................
6. व्याघ्रः च चित्रकः च नदीजलं पातुम् आगतौ। ............................................................
7. सीता च गीता च गीतं गायतः। ............................................................
8. रामः सीतया च लक्ष्मणेन च सह वनम् अगच्छत्। ............................................................
9. अहं मातरं च पितरं च नमामि। ............................................................
10. सीतायै च रामाय च नमः। ............................................................
11. वशिष्ठः च विश्वामित्रः च आचार्यौ आस्ताम्। ............................................................
12. तव पुत्राः च पौत्राः च चिरं जीवन्तु। ............................................................
13. श्रीरामः रावणं च कुम्भकर्णं च हतवान्। ............................................................

**निम्नलिखितवाक्येषु रेखाङ्कितपदानां समासविग्रहं कुरुत –**

1. शिशिरवसन्तौ पुनरायात:। ..................................................
2. सूर्यचन्द्रयो: आभया इदं जगत् विभाति। ..................................................
3. धरायां खगमृगा: चरन्ति। ..................................................
4. पाणिपादं प्रक्षाल्य भोजनं करणीयम्। ..................................................
5. योगिनं शीतोष्णे न बाधेते। ..................................................
6. रामलक्ष्मणभरता: परस्परं वदन्ति। ..................................................
7. मयूरकुक्कुटौ उत्पतत:। ..................................................
8. इन्द्राग्नी देवौ स्त:। ..................................................
9. व्यासनारदौ प्रसिद्धौ आस्ताम्। ..................................................
10. सीतारामौ वनम् अगच्छताम्। ..................................................

## ( घ ) बहुव्रीहिः

**एतानि उदाहरणानि पठत –**

| विग्रहाः | | समस्तपदानि |
|---|---|---|
| नीलम् उत्पलं यस्मिन् तत् (सरः) | = | नीलोत्पलम् (सरः) |
| दत्तं धनं यस्मै सः (जनः) | = | दत्तधनः (जनः) |
| पीतम् अम्बरं यस्य सः (विष्णुः) | = | पीताम्बरः (विष्णुः) |

- अत्र वयं पश्यामः यत् समस्तपदानि अन्यपदार्थं प्रति विशेषणरूपेण प्रयुक्तानि।
- अन्यपदार्थप्रधानः बहुव्रीहिः समासः भवति।
- समस्तपदानि अन्येषां विशेषणरूपे प्रयुक्तानि भवन्ति
- अस्य समासस्य विग्रहे यत्–तत् सर्वनामशब्दयोः रूपाणाम् अर्थानुसारं प्रयोगः भवति।

अन्यानि उदाहरणानि पश्यामः

| विग्रहाः | | समस्तपदानि |
|---|---|---|
| बहूनि फलानि यस्मिन् सः (वृक्षः) | = | बहुफलः (वृक्षः) |
| पीतं दुग्धं येन सः (बालः) | = | पीतदुग्धः (बालः) |
| पीतं दुग्धं यया सा (बालिका) | = | पीतदुग्धा (बालिका) |

**1. अधुना उदाहरणानि अनुसृत्य समस्तपदानि लिखत।**

| | विग्रहाः | समस्तपदानि |
|---|---|---|
| (क) | कृतं भोजनं येन सः (जनः) | ...................... (......................) |
| (ख) | पतितानि पर्णानि यस्मात् सः (वृक्षः) | ...................... (......................) |
| (ग) | वीराः पुरुषाः यस्मिन् सः (ग्रामः) | ...................... (......................) |
| (घ) | अधीतं व्याकरणं येन सः (विद्वान्) | ...................... (......................) |
| (ङ) | दश आननानि यस्य सः (रावणः) | ...................... (......................) |

**2. अधोलिखिते अनुच्छेदे स्थूलाक्षरपदानां समस्तपदानि मञ्जूषायाः चित्वा रिक्तस्थानेषु लिखत।**

| नतपृष्ठः, मरणशीलः, सिद्धार्थः, दुर्बलदृष्टिम्, उत्क्रान्तजीवितम्, विगतप्राणः। |
|---|

एकदा **सिद्धः अर्थः यस्य सः** ...................... विहाराय नगरम् अगच्छत्। तत्र सः एकं रुग्णं **दुर्बला दृष्टिः यस्य तम्** ...................... नरम् अपश्यत्। तस्य नतं पृष्ठं दृष्ट्वा सः अचिन्तयत् – किम् अहम् अपि एवमेव **नतं पृष्ठं यस्य सः** ...................... भविष्यामि? ततः सः **उत्क्रान्तं जीवितं यस्य तं** ...................... नरम् अपश्यत्। सः सारथिम्

अपृच्छत् – अरे! किमर्थं जनाः एवं मनुष्यं बद्ध्वा नयन्ति। सारथिः उवाच – भगवन्! अयं तु **विगताः प्राणाः यस्य सः** ...................... एव। सिद्धार्थः पृष्टवान् – भोः! – किम अहम् अपि मरिष्यामि? सारथिः अवदत् – **मरणं शीलं यस्य सः** ...................... संसारः। सिद्धार्थः तद् दृष्ट्वा विरक्तः जातः।

**3. अधः कर्मधारयस्य बहुव्रीहिसमासस्य च कानिचित् विग्रहवाक्यानि प्रदत्तानि सन्ति। अत्र भेदम् अवगत्य समस्तपदानि रिक्तस्थानेषु लिखत।**

| विग्रहवाक्यानि | समस्तपदानि |
|---|---|
| यथा – चन्द्र इव मुखम् | चन्द्रमुखम् |
| चन्द्रः इव मुखं यस्याः सा | चन्द्रमुखी |
| (क) पतितं पर्णम् | ...................... |
| (ख) पतितानि पर्णानि यस्मात् सः (वृक्षः) | ...................... |
| (ग) पीतम् अम्बरम् | ...................... |
| (घ) पीतम् अम्बरं यस्य सः | ...................... |
| (ङ) वृक्षम् आरूढः | ...................... |
| (च) वृक्षः आरूढः येन सः | ...................... |
| (छ) दश आननानि | ...................... |
| (ज) दश आननानि यस्य सः | ...................... |
| (झ) कृतः अभिषेकः यस्य सः | ...................... |
| (ञ) कृतः अभिषेकः | ...................... |

**4. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा लिखत –**

1. नृपः <u>**विनयं शीलं यस्य सः**</u> आसीत्। ......................
2. <u>**कृष्णः वर्णः यस्य सः**</u> काकः अवदत्। ......................
3. बकः <u>**स्थितप्रज्ञः**</u> इव बहुकालपर्यन्तं जले तिष्ठति। ......................
4. <u>**जाज्वल्यमानशरीरः**</u> मेषः अश्वशालां प्राविशत्। ......................
5. <u>**प्रचण्डाः ज्वालाः यस्य सः**</u> अग्निः प्रसरति। ......................
6. <u>**बद्धः अञ्जलिः यस्य सः**</u> अर्जुनः नारदम् अवदत्। ......................
7. <u>**प्रतिहतान्तः करणः**</u> प्रच्छन्नभाग्यः अचिन्तयत्। ......................
8. काकः आत्मानं <u>**सत्यप्रियं**</u> मन्यते। ......................
9. पश्चात्तापेन <u>**दग्धमानसः**</u> प्रच्छन्नभाग्यः सकरूणम् अक्रन्दत्। ......................
10. <u>**द्वादशाः अक्षाः यस्मिन् तस्य**</u> संवत्सरस्य विषये इदमुच्यते। ......................

## मिश्रितप्रश्नाः

**( क ) अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा कृत्वा लिखत –**

1. **न उद्वेगकरं** ..................... वाक्यं वाङ्मयं तप उच्यते।
2. **अक्षरव्यक्तिः** ..................... इति एकः पाठकस्य गुणः।
3. भारति! तव अयं कोशः **अपूर्वः** ..................... विद्यते।
4. **विद्यया समं** ..................... चक्षुः नास्ति।
5. शुश्रूषाश्रवणादयः **धियः गुणाः** ..................... सन्ति।
6. **शीतलं च तत् सलिलं** ..................... पुरुषं प्रह्लादयति।
7. शिष्यः **स्वमेधया** ..................... पादं गृह्णाति।
8. **प्रियहितं** ..................... वाक्यमपि वाङ्मयं तपः कथ्यते।
9. शारदा **सर्वदा** ..................... भवति।
10. शक्रः **आशया अन्वितः** ..................... राज्ञः समीपम् आगच्छत्।
11. अहं **भवन्मनोरथं** ..................... पूरयितुम् इच्छामि।
12. राजा **नीलोत्पलम्** ..................... इव एकं चक्षुः प्रायच्छत्।
13. काकः **क्रोधेन सहितं** ..................... राजहंसीं तर्जयति।
14. वायसः **कटुभिः क्वणितैः** ..................... जनजागरणं करोति।
15. सर्वेषां महत्त्वं भवति **समयम् अनतिक्रम्य** .....................।
16. बकः **अहिभुजं** ..................... मयूरम् आक्षिपति।
17. **पिकः च काकः च, तयोः** ..................... भेदः वसन्तसमये ज्ञायते।
18. मयूरः **साट्टहासं** ..................... वदति।
19. मेषः **अहः च निशा च, तयोः समाहारः** ..................... पाकशालां प्रविशति।
20. **यूथपः** ..................... कपीन् वनं गन्तुं कथयति।
21. वानराः **राज्ञः भवनं** ..................... त्यक्तुं न इच्छन्ति।
22. **यथोचितं** ..................... क्रियताम् इति राजा आदिशत्।
23. राजा **शालिहोत्रं जानन्ति इति, तान्** ..................... वैद्यान् घोटकचिकित्सां कर्तुम् आह्वयति।
24. **अनिच्छन्** ..................... अपि जनः पापं चरति।
25. स्मृतिभ्रंशाद् **बुद्धेः नाशः** ..................... भवति।
26. युधिष्ठिरः **साश्चर्यं** ..................... पृच्छति।
27. **प्रचण्डाः ज्वालाः यस्य सः** ..................... अग्निः परितः प्रसरति।
28. कथं भवन्तौ **सुष्ठु पन्थाः, तम्** ..................... परित्यज्य कुपथेन गन्तुं प्रवृत्तौ ?

29. बालकाः **नतोन्नते** ...................... मार्गे क्रीडन्ति।

30. **विमूढधीः** ...................... परुषां वाचं वदति।

31. सुधीः जनः **धर्मं प्रददाति इति, ताम्** ...................... वाणीं वदेत्।

32. **अकातरः** ...................... मन्त्री परैः न परिभूयते।

33. अरुणाचलप्रदेशः **सूर्योदयस्य भूमिः** ...................... कथ्यते।

34. मिथुनः एकः **विशिष्टराजपशुः** ...................... वर्तते।

## (ख) उचितविकल्पं चिनुत –

1. ओरिया इति पर्वणि **सेतोः निर्माणं** ...................... क्रियते।
   (क) सेतोर्निर्माणम् (ख) सेतुनिर्माणम् (ग) सेतूर्निर्माणम् (घ) सेतोनिर्माणम्
2. **ब्रह्मायुः** ...................... शतं वर्षाणि मन्यते।
   (क) ब्रह्मणम् आयुः (ख) ब्रह्मणा आयुः (ग) ब्रह्मणः आयुः (घ) ब्रह्मणि आयुः
3. कालः सर्वं **क्रियायाः कलापः, तम्** ...................... पश्यति।
   (क) क्रियाकलापः (ख) क्रियाकलापेन (ग) क्रियाकलापम् (घ) क्रियाकलापाम्
4. **गुरुवचनं** ...................... शिष्यैः उपादेयम्।
   (क) गुरुः वचनम् (ख) गुरुणा वचनम् (ग) गुरवे वचनम् (घ) गुरोः वचनम्
5. जीवितं **न अवद्यं** ...................... भवेत्।
   (क) अनवद्यम् (ख) अवद्यः (ग) अनवद्या (घ) नावद्यम्
6. **अधिगतानि तत्त्वानि येन सः** ...................... गुरुः भवति।
   (क) अधिगततत्त्वानि (ख) अधिगततत्त्वः (ग) अधिगततत्त्वम् (घ) अधिगततत्त्वेन

## (ग) कोष्ठकात् शुद्धम् उत्तरं चित्वा रिक्तस्थानानि पूरयत –

1. अनेन सदृशो महापुरुषः ...................... नास्ति। (त्रिलोके / त्रिलोक्याम्)
2. सः ...................... फलानि खादति। (यथेच्छया / यथेच्छम्)
3. ...................... सरः दृष्ट्वा कः न प्रसीदति? (विकसितपङ्कजः / विकसितपङ्कजम्)
4. ...................... वेदान्तस्य प्रचारः कृतः। (स्वामिविवेकानन्देन / स्वामीविवेकानन्देन)
5. रामः ...................... धावति। (अनुमृगम् / अनुमृगः)
6. सः पण्डितः ...................... अस्ति। (विद्याधनः / विद्याधनम्)

## (घ) अधोलिखितान् सङ्केतान् आधृत्य वर्गप्रहेलिकायां रिक्तस्थानपूर्तिं कृत्वा समस्तपदानि रचयत –

**वामतः दक्षिणम्**

1. जनानाम् अभावः
2. वृक्षस्य समीपम्
6. द्वादश अक्षाः यस्मिन् तत्

**उपरिष्टात् अधः**

1. निर्गता बाधा यस्याः सा
3. वृक्षस्य मूलम्
4. अहिं भुङ्क्ते इति तम्

8. विमूढा धीः यस्य सः
9. शीतलं सलिलम्
11. पङ्कात् जायते इति
12. महान् देवः
15. अहः च रात्रिः च तयो समाहारः
19. जले मग्नः
20. पुस्तकानाम् आलयः
21. सप्तानां पदानां समाहारः

5. न कातरः
7. जलं ददाति इति
10. चित्रेण सहितम्
13. देवस्य आलयः
14. फलानि च पुष्पाणि च
15. रूपस्य योग्यम्
16. राज्ञः पुत्रः
17. नखैः भिन्नः
18. सप्तानाम् अह्नां समाहारः

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| 1 नि | | | 2 | | 3 वृ | क्षम् | × | 4 अ |
| | 5 | | 6 द्वा | द | | | × | हि |
| | | 7 | × | 8 | | | धीः | |
| 9 | त | | 10 स | लि | लम् | 11 प | | |
| | रः | | | 12 | | 13 दे | वः | 14 |
| 15 | | 16 रा | त्रम् | | | | 17 न | |
| | 18 | 19 | | म | ग्नः | | ख | पु |
| रू | | 20 पु | | | ल | यः | | ष्पा |
| पम् | हः | त्रः | 21 स | प्त | | | | णि |

## (ङ) अधोलिखितानि समस्तपदानि समुचितेन विग्रहेण सह मेलयत –

| | समासः | विग्रहः |
|---|---|---|
| यथा – | सम्पूर्णघटः | विद्यया हीनः |
| | वृक्षमूलम् | नीलम् कमलम् |
| | कार्यनिपुणः | सम्पूर्णः घटः |
| | प्रतिपदम् | पीतानि अम्बराणि यस्य सः |
| | नीलकमलम् | वृक्षस्य मूलम् |
| | पीताम्बरः | कार्येषु निपुणः |
| | विद्याहीनः | पदं पदं प्रति |